অজোঽপি সন্নব্যয়াত্মা ভূতানামীশ্বরোঽপি সন্।
প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্মমায়য়া।। (৬)

⇒ শ্লোকোঽয়ং কৃষ্ণদ্বৈপায়ন বেদব্যাসেন বিরচিতম্ মহাভারতস্য ভীষ্মপর্বনি স্থিতঃ শ্রীমদ্ভগবদ্গীতায়াঃ সমুৎকলিতঃ।

কুরুক্ষেত্ররণাঙ্গনে শ্রেষ্ঠঃ বীরবীরঃ অর্জুনঃ চতুর্দিকং অবলোক্য স্বজনান্ দৃষ্ট্বা বিহ্বলং ধৃত্বা রথোপরি উপবিশতি। তস্য হস্তাৎ গাণ্ডিবং স্খলিতং ভবতি। এতদ্ অবস্থায়াং শ্রীকৃষ্ণঃ কৌরবং প্রতি যুদ্ধে উজ্জীবিতং করণায় আলোচ্য শ্লোকস্য অবতারণাং করোতি। অর্থাৎ অয়ং শ্লোকং শ্রীকৃষ্ণঃ অর্জুনং প্রতি উক্তম্।

কৃষ্ণস্তু ভগবান স্বয়ম্। ভগবান শ্রীকৃষ্ণঃ বিনাশরহিতঃ, পুনর্জন্মরহিতঃ, সমস্ত প্রাণিনামপি স্বরে সঞ্চারিতে সত্যপিঃ স্বপ্রকৃতিমধীনস্থং কৃত্বাত্মমায়য়া প্রকটয়তি। স্বয়ম ঈশ্বরঃ শ্রীকৃষ্ণঃ ধর্মসংস্থাপনার্থং বসুদেবস্য পুত্ররূপেন প্রকৃতিম্ অধিষ্ঠায় জাতঃ। সর্বে প্রাণিনঃ প্রকৃতিবশাৎ জায়ন্তে ম্রিয়ন্তে চ। কিন্তু শ্রীকৃষ্ণঃ যদ্যপি অধুনা নরলোকে অবস্থিতঃ তথাপি সঃ নঃ প্রকৃতেঃ বশীভূতঃ। প্রকৃতিঃ স্বয়মেব শ্রীকৃষ্ণস্য বশীভূতা। যোগমায়া ঈশ্বরস্য ঐশীশক্তিঃ। যোগমায়া বলেন ঈশ্বরঃ যথা প্রকৃতিং স্ববশে আনয়তি তথৈব সাধারণান্ মনুষ্যান অপি বিমোহয়তি। অর্জুনঃ অপি এবক্ষা তং শ্রীকৃষ্ণং সারথীরূপ রূপেন সখারূপেন বা অজ্ঞাসীৎ। অতঃ স্বকর্ম সাধনায় শ্রীকৃষ্ণঃ যোগসাধনাদ্বারা আত্মমায়াদ্বারা ত্রিগুণময়ীং প্রকৃতিং স্ববশে কৃত্বা ক্রমশঃ প্রকটয়তি তথা যোগমায়য়া আত্মানম্ আচ্ছাদ্য জগতি বিরাজতে।

---

চাতুর্বর্ণ্যং ময়া সৃষ্টং গুণকর্মবিভাগশঃ।
তস্য কর্তারমপি মাং বিদ্ধ্যকর্তারমব্যয়ম্॥ (১৩)

=> শ্লোকোঽয়ং কৃষ্ণদ্বৈপায়ন বেদব্যাসেন বিরচিতস্য মহাভারতস্য 'ভীষ্মপর্বণি' স্থিতঃ 'শ্রীমদ্ভগবদ্গীতায়াঃ' সমুৎকলিতঃ।

কুরুক্ষেত্ররণাঙ্গনে শ্রেষ্ঠঃ ধনুর্ধরঃ অর্জুনঃ চতুর্দিক্ষু অবলোক্য স্বজনান দৃষ্ট্বা বিহ্বলং দৃষ্ট্বা রথস্যোপরি উপবিশতি। তস্য হস্তাৎ গাণ্ডীবং স্খলিতং ভবতি। এতদ্ অবস্থায়াং শ্রীকৃষ্ণঃ কৌরবং প্রতি যুদ্ধে উদ্দীপিতং করনায় 'শ্রীমদ্ভগবদ্গীতায়াঃ' তথা জ্ঞানযোগস্য অবতারণাং করোতি। শ্লোকেঽস্মিন উন্নতি চতুর্বর্ণস্য সৃষ্টি রহস্য প্রসঙ্গে ভগবান শ্রীকৃষ্ণঃ অর্জুনং প্রতি উক্তম্,

কৃষ্ণস্তু ভগবান স্বয়ম্। সঃ দয়াময়ঃ পুনর্জন্মরহিতঃ বিনাশরহিতঃ চ। সঃ সর্বদা দুষ্টস্য দমনকর্তা শিষ্টজনস্য পালনকর্তা চ। ভগবান শ্রীকৃষ্ণঃ বারংবারং ধর্মসংস্থাপনার্থায় বসুদেবস্য পুত্ররূপেন প্রকৃতিম অধিষ্ঠায় জাতঃ। সঃ সর্বেষাং প্রাণিনাম আশ্রয়স্বরূপঃ। সর্বেষু প্রাণিষু মনুষ্যঃ শ্রেষ্ঠঃ জাতি। শ্রীকৃষ্ণঃ অর্জুনং প্রতি উক্তম — 'চাতুর্বর্ণ্যং ময়া সৃষ্টং' — চতুর্ণাং বর্ণানাং রচনামহমকুর্বম্, তর্হি কিং মনুষ্যানাং চতুর্ধা বিভাজনং কৃতং ময়া? শ্রীকৃষ্ণঃ কথয়তি — নহি, গুণকর্মবিভাগশঃ — গুণানাং মাধ্যমেন কর্মনিষ্ঠতার ভেদাঃ কৃতাঃ। গুণাঃ সন্তি সত্ত্বাদয়ঃ। অর্থাৎ ভগবান্ শ্রীকৃষ্ণঃ সমাজস্য প্রয়োজনে গুণকর্মানুসারেন চতুর্বিভাজনং করোতি। যথা — ব্রাহ্মণঃ, ক্ষত্রিয়াঃ, বৈশ্যাঃ, শূদ্রশ্চ। যদ্যপি সঃ সর্বেষাং বস্তূনাং কর্তা তথাপি স্বং অকর্তারূপেন প্রতিপাদিতং করোতি।

---

(39) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ 39

श्लोकोऽयं कृष्णद्वैपायनवेदव्यासेन विरचितं महाभारतस्य भीष्मपर्वणि स्थितः श्रीमद्भगवद्गीतायाः ~~अस्मत्संकलितः~~।
** ज्ञानयोगनामकात् चतुर्थोऽध्यायात् उत्कलितः।

पूर्वश्लोकेषु ज्ञानं प्रशस्य वक्ष्यमाने श्लोके ज्ञानफलं वर्णयति परमपुरुषेण श्रीकृष्णेन।

श्रद्धावान्, तत्परस्तथा संयतेन्द्रियः पुरुषः एव ज्ञानं प्राप्तुं शक्नोति। भावपूर्वकः जिज्ञासा नहि, तदा तत्त्वदर्शिनः शरणं गते सत्यपि ज्ञानं नहि प्राप्यते। केवला श्रद्धैव पर्याप्ता नास्ति, श्रद्धावान् शिथिलप्रयासोऽपि भवितुं शक्नोति। अतः महापुरुषाणां द्वारा निर्दिष्ट पथोपरि तत्परतापूर्वकमग्रेसरताया अत्यावश्यकताऽस्ति। अनया साकं सम्पूर्णेन्द्रिय संयमः अनिवार्योऽस्ति। यः वासनाभिर्नास्ति विरतः, तदर्थं साक्षात्कार (ज्ञानस्य) प्राप्तिरस्ति कठिना। केवलं श्रद्धावान्, आचरणरतः संयतेन्द्रिय पुरुष एव ज्ञानं प्राप्नोति। प्राप्तज्ञानः असौ तत्क्षणमेव परमशान्तिं लभते, यदनन्तरं किमपि प्राप्तव्यं नावशिष्यते, इयमेव अन्तिमा शान्तिरस्ति, पुनः कदाप्यशान्तो न भवति।

# ज्ञानयोग:

कर्मणो ह्यपि बोधव्यं बोधव्यं च विकर्मणः।
अकर्मणश्च बोधव्यं गहना कर्मणो गतिः। (17)

Explain ⇒ कर्मणः स्वरूपमपि ज्ञातव्यम्, अकर्मणः स्वरूपमपि बोधव्यम्, विकर्मणश्चार्थात् विकल्पशून्य विशेषकर्मणः यदाप्तपुरुषैः क्रियते, तदप्यनुसन्धेयम्, कुतोहि कर्मणो गहना गतिः। कतिपये जनाः विकर्मणः अर्थं निषिद्धं कर्म, मनसा युक्तं कृतं कर्म' इत्याद्यपि कृतवन्तः। वस्तुतोऽत्र 'वि' उपसर्गो विशिष्टताया द्योतकोऽस्ति। प्राप्तेरनन्तरं महापुरुषाणां कर्माणि आत्मविकल्पशून्यानि भवन्ति। आत्मस्थितानाम्, आत्मतृप्तानाम्, आप्तकामानां महापुरुषाणां कृते कर्मत्यागेन कर्मविधानेन न कोऽपि लाभोऽस्ति; पुनरपि ते उत्तरवर्तिनां हिताय कर्म कुर्वन्ति। एतादृशं कर्म च विकर्म विकल्पशून्यमस्ति। विशुद्धमस्तीदं कर्म स्थाने स्थाने समुच्यते। अनेनैव प्रकारेण गीतायां 'वि' इत्युपसर्गस्य प्रयोगः कृतो मिलति, यः विशेषपूर्णतायाः द्योतकोऽस्ति। अनेनैव प्रकारेण 'विकर्म' अत्रापि 'वि' इत्युपसर्गः विशिष्टकर्मणः द्योतकोऽस्ति, यः प्राप्तेरनन्तरं महापुरुषैः सम्पाद्यते, यच्छुभाशुभसंस्कारं न स्थापयति। अधुना भवता विकर्म दृष्टम्, अवशिष्टं तु कर्माकर्मणी, यदत्रिमे श्लोके ज्ञातुं प्रयासं विदधीत। यद्यत्र कर्माकर्मणोः विभाजनं बुद्धौ नागच्छेत् तदा कदापि न बोधो भविष्यति।